**B.A. (Honours) Examination, 2019**
**Semester-II (CBCS)**
**Sanskrit (Honours)**
**Course : CC-3**
**Critical Sanskrit Literature (Prose)**

**Time : 3 Hours** **Full Marks : 60**

Questions are of value as indicated in the margin

सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः

खण्ड - क

1. कस्यचिद् द्वयस्य उत्तरं दत्त – 8×2=16
   (a) शुकनासोपदेशाधारेण राजस्वभाववर्णनं कुरुत।
   (b) शुकनासोपदेशानुसारेण लक्ष्मीवर्णनं कुरुत।
   (c) बाणभट्टस्य शैलीं समालोचयत।
   (d) बाणभट्टस्य जीवनपरिचयं ग्रंथ-परिचयं काल-परिचयं च दत्त।
   (e) शुकतासोपदेशानुसारेण गुरूपदेशसंवंधिनीम् अवधारणां वर्णयत।

2. अधोलिखितं गद्यांशं पठित्वा प्रश्नानुत्तरयत— 1×8=8
   (यथायथम् एकपदेन वाक्येन वा)

   यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इद्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकर-गभस्तयो विशन्ति सुखेनोपदेशगुणाः।

   (a) यौवनारम्भे किं भवति? 1
   (b) अस्मिन् गद्यांशे कस्य गौरवं प्रतीयते। 1
   (c) 'कालुष्यमुपयाति' अस्य पदस्य सन्धिविच्छेदं कुरुत। 1
   (d) 'यूनां' अस्य पदस्य समानार्थकं पदं लिखत। 1
   (e) 'सलिलानि' इत्यस्य पदस्य समानार्थकं पदं लिखत। 1
   (f) अस्मिन् गद्यांशे उपदेष्टा कः अस्ति? 1
   (g) 'आपतन्ति'-अस्य पदस्य धातुं लकारञ्च निर्दिशत। 1
   (h) यौवनकालस्य कः प्रभावो भवति? 1

## खण्ड - ख

3. कस्यचिदेकस्य प्रश्नस्य उत्तरं दत्त – 10
   - (a) दण्डितः शैल्याः विविधस्वरूपाणि समालोचयत।
   - (b) दण्डिनः जीवनस्य समग्रपरिचयं दत्त।
   - (c) उपमा कालिदासस्य भारवेरर्थगौरवम्।
     दण्डिनः पदलालित्यम् माघे सन्ति त्रयो गुणाः।।
     अत्र "दण्डिनः पदलालित्यम्" इत्युक्तिं सोदाहरणं समालोचयत।

4. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् यथायथं एकपदेन वाक्येन वा उत्तरयत। — 8

अथ सोऽप्याचचक्षे-देव! मयाऽपि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लेशार्हः क्वचित्कूपाभ्याशे अष्टवर्षदेशीयो दृष्टः। स च त्रासगद्‌गदमगदत्- महाभाग, क्लिष्टस्य मे क्रियतामार्य! साहाय्यकम्। अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चन्निह कूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः। तमलमस्मि नाहमुद्धर्तुम् इति।

   - (a) अस्मिन् गद्यांशे कः कं किं कथयति? 2
   - (b) 'उदकम्' अस्य पदस्य समानार्थकं पदं लिखत। 1
   - (c) 'प्राणापहारिणी' अस्य पदस्य सन्धिविच्छेदं कुरुत। 1
   - (d) कुमारस्य तस्य संरक्षकस्य नाम किम् अस्ति। 2
   - (e) 'पतितः' अत्र धातुं प्रत्ययञ्च निर्दिशत। 1
   - (f) 'तमलमस्मि' अस्मिन् पदे धातुं लकारञ्च निर्दिशत। 1

5. संस्कृतगद्यसाहित्यस्य उत्पत्तिः क्रमशः विकासश्च देवनागरी–लिप्याम् प्रतिपाद्यताम् 9

अथवा

आधुनिकगद्यकारेषु पंडितस्य अम्बिकादत्तव्यासस्य योगदानम् आलोच्यताम्।

6. केषाञ्चन त्रयाणां टिप्पणीं लिखत– 3×3=9
   - (a) शिवराजविजयम्। 2
   - (b) सुबन्धुः। 1
   - (c) आचार्यो विष्णुशर्मा। 1
   - (d) शुकसप्ततिः। 2
   - (e) हितोपदेशः। 1
   - (f) नारायणपण्डितः।